संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 134 पुष्पम्

# भारतीयदर्शनेषु वादविमर्शः

प्रधान-सम्पादकः
प्रो. मुरलीमनोहरपाठकः
कुलपतिः

सम्पादकः
प्रो. ए.एस्. आरावमुदन्

सह-सम्पादकः
डॉ. विजयगुप्ता

शोध-प्रकाशनविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
नवदेहली-110016

संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 134 पुष्प

# भारतीयदर्शनेषु वादविमर्शः

प्रधान-सम्पादकः
**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः

सम्पादकः
**प्रो. ए.एस्. आरावमुदन्**
पीठप्रमुखः, दर्शनशास्त्रपीठम्

सह-सम्पादकः
**डॉ. विजयगुप्ता**
सहायकाचार्यः, सर्वदर्शनविभागः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**नई दिल्ली-110016**

प्रकाशक:
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय:
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016

© प्रकाशकाधीन

प्रकाशनवर्षम् : 2024

ISBN : 978-81-972035-6-5

मूल्यम् : ₹ 700.00

मुद्रक:
डी.वी. प्रिन्टर्स
97-यू.बी., जवाहरनगरम्, देहली-110007

# विषयानुक्रमणिका


| विषयाः | पृ.सं. |
|---|---|
| प्ररोचना | iii |
| **Editorial** | **v** |
| प्रास्ताविकम् | vii |
| 1. जैनदर्शने स्याद्वादमीमांसा<br>-आचार्यवीरसागरो जैनः | 1 |
| 2. अर्हद्दर्शने अनेकान्तस्याद्वादौ<br>-प्रो. कुलदीपकुमारः | 6 |
| 3. वेदान्तदृष्ट्या सत्कार्यवादविचारः<br>-कुलदीपचन्द्रः | 12 |
| 4. न्याय-द्वैतमतयोः प्रामाण्यविमर्शः<br>-अनुराग जि रायचूर् | 17 |
| 5. शाङ्करदर्शने आभासवादः<br>-मानसकुमारबेहेरा | 22 |
| 6. न्यायनये कारणतावादविमर्शः<br>-शान्तनुदासः | 27 |
| 7. न्यायनये सिद्धान्तवादविमर्शः<br>-दीपकमण्डलः | 32 |
| 8. शक्तिवादः -कृतिसिंघलः | 39 |

# जैनदर्शने स्याद्वादमीमांसा

-आचार्यवीरसागरो जैनः

'स्याद्वादः' इत्ययमस्ति जैनदर्शनस्यैकः प्रमुखः सिद्धान्तः। न केवलं प्रमुखः सिद्धान्तः, अपितु प्राणभूतः सिद्धान्तो वर्तते। सुप्रसिद्धजैनाचार्याः आचार्यामृतचन्द्रसूरिमहोदयाः पुरुषार्थसिद्ध्युपायनामके ग्रन्थे लिखन्ति-

**परमागमस्य जीवं निषिद्धजात्यन्धसिन्धुरविधानम्।**
**सकलनयविलसितानां विरोधमथनं नमाम्यनेकान्तम्।।**[1]

अर्थात् स्याद्वादः जैनदर्शनस्य जैनागमस्य वा जीवभूतः प्राणभूतः सिद्धान्तः अस्ति। यथा प्राणान् विना सर्वे एव मृतका इति कथ्यन्ते तथैव स्याद्वादं विना जैनागमः जैनदर्शनं वा मृतं शून्यं वावतिष्ठति। स्याद्वादस्य महत्त्वं परिलक्ष्य जैनदर्शनस्य अपरं नाम स्याद्वाददर्शनमपि संसूचितं यत्र-तत्र। जैना अपि अतएव 'स्याद्वादिनः' इति पदेन सम्बोध्यन्ते। एतेन ज्ञातुं शक्यते यत् जैनदर्शने स्याद्वादस्य कीदृशं महत्त्वमङ्गीकृतं वर्तते। उच्यतेऽपि-

**स्याद्वादो विद्यते यत्र पक्षपातो न विद्यते।**
**अहिंसायाः प्रधानत्वं जैनधर्मः स उच्यते।।**[2]

तात्पर्यमिदं यत् यथा अहिंसा जैनदर्शनस्य एकः प्रमुखः सिद्धान्तः वर्तते तथैव स्याद्वादोऽपि जैनदर्शनस्य एकः प्रमुखः प्राणभूतः सिद्धान्तः विद्यते, स्याद्वादं विना जैनदर्शनस्य सर्वं चिन्तनं मिथ्या भवति।

जैनदर्शनस्य प्रायशः सर्वेषु ग्रन्थेषु एव अस्य सिद्धान्तस्य व्याख्यानं कृतं वर्तते, तथापि स्वतन्त्ररूपेणापि नैके ग्रन्थाः प्रणीताः सन्ति। तेषामध्ययनेन

---

* आचार्यः, जैनदर्शनविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली-110016

1. पुरुषार्थसिद्ध्युपायः, श्लोकः 2
2. प्राकृतविद्या, दिसम्बर 2008, पृष्ठ संख्या 20

# अर्हद्दर्शने अनेकान्तस्याद्वादौ

-प्रो. कुलदीपकुमारः*

**भवबीजाङ्कुरजनना रागाद्या क्षयमुपगताः यस्य।**
**ब्रह्मा वा विष्णुर्वा हरो जिनो वा नमस्तस्मै॥**[1]

भूमिका-

भारतीयवाङ्मये जैनदर्शनम् एकं प्राचीनदर्शनं विद्यते। अस्य दर्शनस्य अनेकानि पुरातनानि नामानि राजन्ते। यथा अर्हद्दर्शनं, निर्ग्रन्थदर्शनम्, अहिंसादर्शनं, स्याद्वाददर्शनम्, अनेकान्तदर्शनं चेत्यादीनि।

येन प्रकारेण विभिन्नदर्शनानां प्रवर्तकाः ऋषिमहर्षय अभवन्, तेन प्रकारेण जैनदर्शनस्य प्रवर्तकः कोऽपि व्यक्तिविशेषः नास्ति। जैनशब्दः 'जिन' शब्दात् निष्पन्नोऽस्ति। जिनशब्दश्च संस्कृतभाषायाः 'जि' धातो 'नक्' प्रत्यये सति निष्पन्नः। जिनशब्दस्यार्थो वर्तते यो जनः **'अनेकभवगहन-विषयव्यसनप्रापणहेतून् कर्मारातीन् जयतीति जिनः।'**[2]

एतादृशैः जिनैः उपदिष्टदर्शनं जैनदर्शनमिति उच्यते। प्रत्येकं युगे चतुर्विंशतितीर्थङ्कराः भवन्ति, तथा ते अनादिकालात् प्रचलत् धर्मदर्शनञ्च प्रतिपादयन्ति। वर्तमानयुगे ऋषभदेवादारभ्य महावीरपर्यन्तं चतुर्विंशतितीर्थङ्करैः जैनधर्मदर्शनयोः सिद्धान्तः प्रतिपादितः।

तदन्तरम् अनेके जैनदर्शनमर्मज्ञा आचार्या अभवन्। तेषाम् आचार्याणां न केवलं जैनदर्शने अपितु सम्पूर्णभारतीयवाङ्मये महत्त्वपूर्णं स्थानं विद्यते।

---

* आचार्यः, जैनदर्शनविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली- 110016

1. हेमचन्द्रसूरिः, स्याद्वादमञ्जरी, प्रस्तावना, पृष्ठम्- 71
2. आचार्यामृतचन्द्रः, पञ्चास्तिकायतात्पर्यवृत्तिः, 1/4/18